
# 7 सङ्ख्या



**सुरेशः** : अहो रमेश ! कुत्र गच्छति ?

**रमेशः** : आपणं गच्छामि ।

**सुरेशः** : अहम् अपि आगच्छामि ।

**रमेशः** : भवान् किं क्रेतुम् इच्छति ।

**सुरेशः** : अहं फलानि क्रेतुम् इच्छामि ।

**रमेशः** : पश्यतु, तत्रैव फलविपणी अस्ति । चलतु ।

| | | |
|---|---|---|
| **सुरेशः** | : | पञ्चम्यां विपण्यां पक्वानि फलानि सन्ति । |
| **रमेशः** | : | भद्र, आम्रफलानां कियत् मूल्यम् ? |
| **फलविक्रेता** | : | पञ्चाशत् रूप्यकाणां दश फलानि । |
| **रमेशः** | : | द्वादशकदलीफलानाम् ? |
| **फलविक्रेता** | : | षोडशरूप्यकाणि । |
| **रमेशः** | : | चतुर्णां नारङ्गफलानाम् ? |
| **फलविक्रेता** | : | विंशतिः रूप्यकाणि । |
| **सुरेशः** | : | तर्हि मह्यं त्रिंशत् कदलीफलानि ददातु । |
| **रमेशः** | : | मह्यं द्वादश नारङ्गफलानि ददातु । |
| **सुरेशः** | : | कियत् मूल्यम् ? |
| **फलविक्रेता** | : | कदलीफलानां चत्वारिंशत्, नारङ्गफलानां च षष्टिः । |
| **रमेशः** | : | शतरूप्यकाणि स्वीकरोतु । |
| **फलविक्रेता** | : | भवतु । |

## Glossary

**कदलीफलम्** a banana **नारङ्गफलम्** an orange **आम्रफलम्** a mango **आपणम्** a shop **क्रेतुम्** for buying **विपणी** a shop **पक्वानि** ripe **भद्र** gentleman **कियत्** how much **भवतु** ok

## Exercise

**1. Pronounce the following words properly :**

आपणम्, क्रेतुम्, तत्रैव, विपण्यांति, पञ्चाशत्, रूप्यकाणाम्, चतुर्णाम्, नारङ्गफलानाम्, मह्यम्, शतरूप्यकाणि

**2.** Answer the following questions in Sanskrit :

(1) द्वादश कदलीफलानां कियत् मूल्यम् ?

(2) कति नारङ्गफलानां मूल्यं विंशति रूप्यकाणि ?

(3) कः फलविक्रेत्रे शतरूप्यकाणि ददाति ?

(4) रमेशः कति नारङ्गफलानि क्रीणाति ?

(5) त्रिंशत् कदलीफलानां कियत् मूल्यम् ?

**3.** Match 'A' and 'B' appropriately :

| | A | B |
|---|---|---|
| (1) | नवनवतिः | ९६ |
| (2) | षट्सप्ततिः | ४९ |
| (3) | नवचत्वारिंशत् | ९९ |
| (4) | एकाशीतिः | ७६ |
| (5) | षण्णवतिः | ८१ |

**( A )** Fill in the gaps :

(1) ____________________ कदलीफलानां चतुस्त्रिंशत् रूप्यकाणि।

(2) पञ्च दाडिमानां मूल्यं ____________________ रूप्यकाणि।

(3) दश आम्रफलानां मूल्यं ____________________ रूप्यकाणि।

**( B )** State whether the following statements are 'True' or 'False' on the basis of the table given in Q-4 :

(1) दश सेवफलानां मूल्यं अष्टनवति रूप्यकाणि । ( )

(2) उपनेत्रस्य मूल्यं पञ्चाशद् रूप्यकाणि । ( )

(3) युतकस्य मूल्यं पञ्च षष्टिः रूप्यकाणि । ( )

## 4. Answer the following questions on the basis of this table :

| फलानि | मूल्यम् | वस्तूनि | मूल्यम् |
|---|---|---|---|
| द्वादश कदलीफलानि | ३५ | उपनेत्रम् | ७५ |
| पञ्च दाडिमानि | ४० | कर्तरी | ४६ |
| दश सेवफलानि | ९८ | तालम् | ६० |
| द्राक्षाफलानि | ४६ | घटः | ८० |
| चतुर्विंशतिः आम्रफलानि | १०० | युतकम् | ६५ |

**Questions :**

(1) कस्य मूल्यं पञ्चसप्ततिः रूप्यकाणि अस्ति ?

(2) पञ्चदाडिमानां मूल्यं कति रूप्यकाणि अस्ति ?

(3) तालस्य मूल्यं कति रूप्यकाणि अस्ति ?

(4) षट्चत्वारिंशत् रूप्यकाणि कस्य कस्य मूल्यं अस्ति ?

## 5. Write in words :

(1) 68 : ____________________

(2) 74 : ____________________

(3) 100 : ____________________

(4) 88 : ____________________

(5) 57 : ____________________

6. **Complete the following table :**

| | | | |
|---|---|---|---|
| | द्विषष्टिः | ८२ | |
| ८७ | | | त्रिपञ्चाशत् |
| | द्विनवतिः | ८३ | |
| ५६ | | | पञ्चचत्वारिंशत् |
| | सप्तत्रिंशत् | ८८ | |

## Activity

(1) Prepare number cards and word cards of No 1 to 100.

(2) Frame five questions of each - using 'कति' and 'कियत्'

**Illustration :** (1) पाण्डवाः कति सन्ति ? (2) घटे कियत् जलम् अस्ति ?

किं भवान् जानाति ?

भारतदेशे द्वादश ज्योतिर्लिङ्गानि सन्ति ।

# संख्या

१ से १०० तक संख्यावाचक शब्द।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १. | एकम् | २१. | एकविंशतिः | ४१. | एकचत्वारिंशत् | ६१. | एकषष्टिः | ८१. | एकाशीतिः |
| २. | द्वे | २२. | द्वाविंशतिः | ४२. | द्विचत्वारिंशत् | ६२. | द्विषष्टिः | ८२. | द्वयशीतिः |
| ३. | त्रीणि | २३. | त्रयोविंशतिः | ४३. | त्रिचत्वारिंशत् | ६३. | त्रिषष्टिः | ८३. | त्र्यशीतिः |
| ४. | चत्वारि | २४. | चतुर्विंशतिः | ४४. | चतुश्चत्वारिंशत् | ६४. | चतु:षष्टिः | ८४. | चतुरशीतिः |
| ५. | पञ्च | २५. | पञ्चविंशतिः | ४५. | पञ्चचत्वारिंशत् | ६५. | पञ्चषष्टिः | ८५. | पञ्चाशीतिः |
| ६. | षट् | २६. | षड्विंशतिः | ४६. | षट्चत्वारिंशत् | ६६. | षट्षष्टिः | ८६. | षडशीतिः |
| ७. | सप्त | २७. | सप्तविंशतिः | ४७. | सप्तचत्वारिंशत् | ६७. | सप्तषष्टिः | ८७. | सप्ताशीतिः |
| ८. | अष्ट | २८. | अष्टाविंशतिः | ४८. | अष्टचत्वारिंशत् | ६८. | अष्टषष्टिः | ८८. | अष्टाशीतिः |
| ९. | नव | २९. | नवविंशतिः | ४९. | नवचत्वारिंशत् | ६९. | नवषष्टिः | ८९. | नवाशीतिः |
| १०. | दश | ३०. | त्रिंशत् | ५०. | पञ्चाशत् | ७०. | सप्ततिः | ९०. | नवतिः |
| ११. | एकादश | ३१. | एकत्रिंशत् | ५१. | एकपञ्चाशत् | ७१. | एकसप्ततिः | ९१. | एकनवतिः |
| १२. | द्वादश | ३२. | द्वात्रिंशत् | ५२. | द्विपञ्चाशत् | ७२. | द्विसप्ततिः | ९२. | द्विनवतिः |
| १३. | त्रयोदश | ३३. | त्रयस्त्रिंशत् | ५३. | त्रिपञ्चाशत् | ७३. | त्रिसप्ततिः | ९३. | त्रिनवतिः |
| १४. | चतुर्दश | ३४. | चतुस्त्रिंशत् | ५४. | चतुष्पञ्चाशत् | ७४. | चतुस्सप्ततिः | ९४. | चतुर्नवतिः |
| १५. | पञ्चदश | ३५. | पञ्चत्रिंशत् | ५५. | पञ्चपञ्चाशत् | ७५. | पञ्चसप्ततिः | ९५. | पञ्चनवतिः |
| १६. | षोडश | ३६. | षट्त्रिंशत् | ५६. | षट्पञ्चाशत् | ७६. | षट्सप्ततिः | ९६. | षण्णवतिः |
| १७. | सप्तदश | ३७. | सप्तत्रिंशत् | ५७. | सप्तपञ्चाशत् | ७७. | सप्तसप्ततिः | ९७. | सप्तनवतिः |
| १८. | अष्टादश | ३८. | अष्टात्रिंशत् | ५८. | अष्टपञ्चाशत् | ७८. | अष्टसप्ततिः | ९८. | अष्टनवतिः |
| १९. | नवदश | ३९. | नवत्रिंशत् | ५९. | नवपञ्चाशत् | ७९. | नवसप्ततिः | ९९. | नवनवतिः |
| २०. | विंशतिः | ४०. | चत्वारिंशत् | ६०. | षष्टिः | ८०. | अशीतिः | १००. | शतम् |

**"हसामः"**

"अद्य पाठः अस्ति इत्यस्य भविष्यत्कालरूपं किम् ?"

"श्वः विरामः भविष्यति इति ।"

"कथम् एतत् ?"

"यतः श्वः रविवासरः"